# प्रज्ञाविवर्धन कार्तिकेय स्तोत्रं

**। स्कंद उवाच ।**

योगीश्वरो महासेनः कार्तिकेयोऽग्निनंदनः ।
स्कंदः कुमारः सेनानीः स्वामी शंकरसंभवः ॥ 1

गांगेयस्ताम्रचूडश्च ब्रह्मचारी शिखिध्वजः ।
तारकारिरुमापुत्रः क्रौंचारिश्च षडाननः ॥ 2

शब्दब्रह्मसमुद्रश्च सिद्धः सारस्वतो गुहः ।
सनत्कुमारो भगवान् भोगमोक्षफलप्रदः ॥ 3

शरजन्मा गणाधीशः पूर्वजो मुक्तिमार्गकृत् ।
सर्वागमप्रणेता च वांछितार्थप्रदायकः ॥ 4

अष्टाविंशतिनामानि मदीयानीतियः पठेत् ।
प्रत्यूषे श्रद्धया युक्तो मूको वाचस्पतिर्भवेत् ॥ 5

महामंत्रमयानीति मम नामानुकीर्तनं ।
महाप्रज्ञामवाप्नोति नात्र कार्या विचारणा ॥ 6

॥ इति श्रीरुद्रयामले प्रज्ञाविवर्धनाख्यं श्रीमत्कार्तिकेयस्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam